7 8
Name of Garuda, the mount of Vishnu 10. स्याद्वनतेयः पवनाशनाशः,
9 10
सुरेन्द्रजित्कश्यपनन्दनश्च ॥ ३० ॥

1 2 3 4 5 6
Name of Vishnu's wife 9. लक्ष्मीः श्रीः कमला पद्मा पद्मवासा हरिप्रिया ।
7 8 9
क्षीरोदतनया मा च शब्दज्ञैरिन्दिरा स्मृता ॥३१॥

1 2 3 4 5
प्रद्युम्नो मकरध्वजो मनसिजः सङ्कल्पजन्माङ्गजः,
6 7 8 9 10 11
पञ्चेषुः कुसुमायुधश्च मदनो मारः स्मरो मन्मथः ।
12 13 14 15 16
Cupid, the god of love 30. कन्दर्पो झषकेतनो रतिपतिः श्रीनन्दनो हृच्छयः,
17 a 18 19 20
कामः शम्बरसूदनो मधुसखः शृङ्गारयोनिः स्मृतः ॥ ३२ ॥
21 b 22 23 24
दर्पकः शूपकारातिरनङ्गो विषमायुधः ।
25 26 27 28
आत्मभूर्मनसिशयः पुष्पधन्वा मनोभवः ॥ ३३ ॥
29 30 1 2
मापत्यमिरजश्चैव कामपत्नी रतिः स्मृता । Cupid's wife 2.
1 2 c
Cupid's son 2. अनिरुद्धश्च तत्सूनुरुषारमण इष्यते ॥ ३४ ॥

1 2 3 4 5
आदित्यः सविता सहस्रकिरणः प्रद्योतनो भास्कर-
6 7 8 9 10 11
स्तिग्मांशुस्तरणिस्तथा दिनमणिर्भास्वान्विवस्वान्हरिः ।
12 13 14 15 16 17 18
मार्तण्डस्तपनो विकर्तन इनः पूषा पतङ्गो भगः,
19 20 21 22 23 24 25
सूर्यो गोपतिरर्यमा दिनकरः सूरोंऽशुमाली रविः ॥ ३५ ॥
d 26 27 28 29 30 31 32
The sun 47. मिहिरो विरोचनोऽर्कस्तिमिररिपुर्द्युमणिरंशुमानंशुः ।
33 34 35 36 37
हरिदश्वः सप्ताश्वः प्रभाकरो भानुमान्भानुः ॥ ३६ ॥
38 39 40 41 42 33
ब्रध्नो हंसः खगो मित्रश्चित्रभानुरहर्पतिः ।
44 45 46 47
कर्मसाक्षी जगच्चक्षुर्द्वादशात्मा त्रयीतनुः ॥ ३७ ॥

a शम्बरसूदन b सूर्पका, सूर्पका, c रमणमुच्यते d मिहरो ।